हिमसंस्कृतवार्ताः
दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-39 | 1 | दिसम्बर 9, 2024 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्धः ५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् मार्गशीर्षशुक्लाष्टमीनवमी तिथिः मार्गशीर्ष २४ प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलस्य द्वयोः पंचायतयोः राष्ट्रीयपुरस्कारः,



3 शिमला-फागलीसंस्कृतमहाविद्यालये किशोरशर्मा अध्यक्षः नरेन्द्रश्च उपाध्यक्षः



4 धारावाहिकं गीताप्रश्नोत्तरम् - ८३



## सुभाषितम्

**अष्टौ गुणाः पुरुषं दीपयन्ति,**
**प्रज्ञा कौल्यं च दमः श्रुतं च।**
**पराक्रमश्चाबहुभाषिता च,**
**दानं यथाशक्ति कृतज्ञता च।।**

हिन्दर्थः- बुद्धि, कुलीनता, इन्द्रिय-निग्रह, शास्त्रज्ञान, पराक्रम, मितभाषिता, शक्ति के अनुसार दान और कृतज्ञता- ये आठ गुण मनुष्य की ख्याति बढ़ा देते हैं।

## विद्रोहिभिः सीरियादेशस्य राजधान्यां दमिश्कोपरि नियन्त्रणं विहितम्



विद्रोहिभिः सीरियादेशस्य राजधान्यां दमिश्कोपरि नियन्त्रणं विहितम्। वार्ताहरानुसारं तत्रत्यः राष्ट्रपतिः बशर अल-असद इत्येषः देशं परित्यज्य अज्ञातस्थाने पलायितः। विद्रोहिभिः द्विसप्ताहादपि अल्पसमये चत्वारि-नगराणि अधिकृतानि। सीरियादेशस्य प्रधानमन्त्रिणा मोहम्मद गाजी अल-जलाली इत्यमुना कथितं यत् सः शान्तिपूर्णरीत्या विपक्षिभ्यः प्रशासनं दातुं सन्नद्धः वर्तते। विद्रोही-दलेन प्रोदीरितं यत् असद शासनस्य पतनेन सीरियादेशे अन्धकारमययुगस्य अन्तः नूतनयुगस्य च समारम्भः भविष्यति।

## जोधपुरे सीमासुरक्षाबलस्य भूमिकायाः प्रशंसाम् अकरोत् केन्द्रीयगृहमन्त्री श्री अमितशाहः



हिमसंस्कृतवार्ताः। केन्द्रीयगृहमन्त्री श्री अमित शाहः राजस्थानस्य जोधपुरे सीमा सुरक्षा बलस्य षष्टीतमे स्थापनादिवसस्य उत्सवे निजसंबोधने सीमासुरक्षाबलस्य भूमिकायाः प्रशंसाम् अकरोत्। सः अवदत् यत् सीमासुरक्षायां, छद्ममुद्रां आदानं-प्रदानं निवारयितुं, वामपक्षीय-उग्रवादस्य निवारणे च सीमासुरक्षाबलस्य भूमिका प्रशंसनीया अस्ति।
श्रीशाहमहोदयः देशस्य प्रथमा रक्षापङ्क्तिमालक्ष्य षड्दशकसेवायाः कृते बीएसएफ इति सीमासुरक्षाबलस्य सैन्यबलस्य प्रशंसाम् अकरोत्। असौ अस्य सैन्यबलस्य साहसं, शौर्यं, त्यागं च प्रकाशितवान्। असौ पंचषष्ट्यधिकोनविंशशतमवर्षाद् पूर्वपश्चिमसीमयोः सुरक्षायां बीएसएफ इत्यस्य महत्त्वपूर्णां भूमिकां स्वीकृतवान् । गृहमन्त्री उक्तवान् यत् देशस्य सीमासुरक्षानीतिः बहुवर्षेभ्यः अस्पष्टा आसीत्, परञ्च प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे अस्मिन् महत्त्वपूर्णानि परिवर्तनानि जातानि। सः अवदत् यत् सीमासंरचनायाः सुदृढीकरणे सर्वकारेण ध्यानं प्रदत्तम्, यस्य कृते प्रतिवर्षं आयव्ययकस्य प्रावधानं क्रियते। अर्धसैन्यबलानाम् कल्याणाय अपि सर्वकारेण अनेकाः पदक्षेपाः उत्थापिताः सन्ति । अस्मिन्नेव गृहमन्त्रिणा अमितशाहेन पथचलनस्य निरीक्षणं कृत्वा बीएसएफ-कार्मिकेभ्यः उत्तमसेवायै वीरतापुरस्काराः, सैन्य सेवा पुरस्काराः प्रदत्ताः।



प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु
To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp number

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## विदेशमंत्री डॉ. एस. जयशंकरः बहरीनदेशे मनामावार्तायां भागं अभजत्




हिमसंस्कृतवार्ताः। विदेशमंत्री डॉ. एस. जयशंकरः अद्य बहरीनदेशे मनामावार्तायां भागं अभजत्। विदेशमन्त्रिणा डॉ. एस. जयशंकरेण मनामावार्तायां पश्चिमएशियामालक्ष्य भारतस्य व्यापकरणनीतिः प्रकाशिता। एतस्मिन् तेन भारतस्य आर्थिक-सामरिक हितानां महत्वोपरि बलं प्रदत्तम्। वार्तायाः समापनसत्रे प्रवदता डॉ. जयशंकरेण विज्ञापितं यत् भारत-खाड़ी-सहयोग परिषद् ईरानइराकयोः साकं अशीत्यधिकैकशतं बिलियन डॉलरमितात्मकः वार्षिकव्यापारः करोति। डॉ. जयशंकरः कतरयात्रायाः समाप्त्यनन्तरं स्वीययात्रायाः द्वितीयचरणे गतरात्रौ बहरीनदेशस्य मनामानगरे सम्प्राप्तवान्। बहरीनस्य विदेशमन्त्रिणा डॉ. अब्दुल्लातिफ बिन राशित अल जायनी इत्यमुना तस्य स्वागतमपि विहितम्। अन्ताराष्ट्रिय-सामरिक अध्ययन-संस्थानेन समायोजिता इयं मनामावार्ता पश्चिम एशियाक्षेत्रेषु सुरक्षा प्रकरणानि अधिकृत्य चर्चायाः कश्चन् प्रमुखमञ्चः वर्तते। अनेन महत्वपूर्ण-क्षेत्रियसमाह्वानानां समाधानार्थं विश्वस्य उच्चस्तरीय-नीति-निर्मातारः विशेषज्ञाश्च एकत्रिताः भवितुमर्हन्ति।

## उत्तराखण्डे मुख्यमन्त्री पुष्करसिंहधामी चारधाम-यात्रायाः आधिकारिकरूपेण उद्घाटनं कृतवान्



उत्तराखण्डे चारधामयात्रा समारब्धा। यत्र भक्ताः चतुर्षु पवित्रधामसु शिशिरनिवासस्थानानां भ्रमणं करिष्यन्ति। मुख्यमन्त्री पुष्करसिंहधामी रुद्रप्रयागमण्डलस्य उखीमठस्य ओंकारेश्वरमन्दिरस्य आधिकारिकरूपेण उद्घाटनं कृतवान्। यत्र शिशिरऋतौ भगवतः केदारनाथस्य मूर्तिः प्रतिष्ठितः वर्तते। अस्मिन् अवसरे मुख्यमन्त्री शिशिरचारधामयात्राम् आचरतां तीर्थयात्रिकाणां सौविध्यं वर्धनार्थं सर्वकारस्य प्रतिबद्धतायाः उपरि बलं प्रदत्तवान्। रुद्रप्रयागे अन्यस्मिन् कार्यक्रमे मुख्यमन्त्री घोषितवान् यत् राज्यसर्वकारः शीतकालीन-तीर्थयात्रायाः प्रचारार्थं अधिकारिभ्यः मार्गदर्शिकां प्रददाति। अनेन माध्यमेन क्षेत्रे आध्यात्मिकपर्यटनं वर्धिष्यति, सममेव भक्ताः उत्तराखण्डस्य शीतकालीन दृश्यानाम् आकर्षणस्य च अनुभवं अपि करिष्यन्ति।

## उत्तरभारतस्य केषुचिद् भागेषु वृष्टेः सम्भावना

हिमसंस्कृतवार्ताः। भारतीय-ऋतुविज्ञान-विभागेन असम-मेघालय-नागालैंड-मणिपुर-मिजोरम-त्रिपुरादिषु प्रातः काले च प्रगाढ तुषारवरणम् अनुमानितम्। पंजाब-हरियाणा-चण्डीगढ़-झारखंड-सिक्किम-पश्चिम बंगालेषु च एतादृशी स्थितिः एव अनुमानिता । सहैव आगामी-दिवसद्वयं यावत् पंजाबस्य हरियाणायाः चण्डीगढ़स्य च केषुचित् स्थलेषु वृष्टिः अपि संभाव्यते।

## राइजिंग-राजस्थान-वैश्विकशिखरसम्मेलनस्य उद्घाटनं करिष्यति प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी अद्य राजस्थानस्य हरियाणायाश्च यात्राम् विधास्यति। श्रीमोदी प्रातः जयपुरनगरे गमिष्यति, यत्र सः राइजिंग-राजस्थान-वैश्विक शिखर सम्मेलनस्य उद्घाटनं करिष्यति। अवसरेऽस्मिन् सः तत्र उपस्थित जनान् अपि सम्बोधयिष्यति। मध्याह्ने सः हरियाणायाः पानीपतक्षेत्रे बीमा-सखि योजनायाः शुभारम्भं विधास्यति। इयं योजना अष्टादशवर्षात् सप्ततिः वयोवर्गीयानां महिलानां सशक्तिकरणार्थं निर्मितास्ति। कार्यक्रमावधौ प्रधानमन्त्री हरियाणायाः करनालक्षेत्रे महाराणा प्रताप-बागवानी-विश्वविद्यालयस्य मुख्यपरिसरस्य आधारशिलामपि स्थापयिष्यति।

## बॉर्डर-गावस्कर-ट्रॉफी-आस्ट्रेलियादलेन भारतदलं दश स्तोभैः पराजितम्

एडिलेड्-ओवल - क्रीडांगणे प्रचाल्यमाणायां बॉर्डर्-गावस्कर-ट्रॉफी क्रीडायाः द्वितीय क्रिकेटनिकषस्पर्धायां आस्ट्रेलियादलेन भारतदलं दश स्तोभैः पराजितम् । एतेन विजयेन उभयोः पञ्चक्रीडाश्रृङ्खलायां एक-एकं द्वंद्वं विजित्य सममधिगतौ।



# अपूर्णोत्तराणां कृते अपि अंकाः प्रदत्ताः भविष्यन्ति,

## शिक्षामण्डलं नूतनं व्यवस्थाम् आरभेत् दशमी-द्वादशीकक्षयोः छात्रेभ्यः आश्रयः



**हिमसंस्कृतवार्ताः - धर्मशाला।** छात्राणां उत्तीर्णताप्रतिशतं वर्धयितुं हिमाचलप्रदेश-विद्यालयीयशिक्षामण्डलम् अद्वितीयम् उपक्रमं कर्तुं गच्छति। अस्य अन्तर्गतम् अग्रिमशैक्षणिकसत्रात् अर्थात् २०२५ तमस्य वर्षस्य मार्चमासात् आरभ्य एषा नूतना व्यवस्था कार्यान्विता भविष्यति। दशमी-द्वादशी कक्षायाः छात्राः अपि आगामिवर्षे आयोज्यबोर्डपरीक्षायाः समये केषां प्रश्नानां कति उत्तराणि लिखित्वा कति अंकाः दास्यन्ते इति स्वयमेव ज्ञातुं शक्नुवन्ति। छात्राः चरणवारचिह्नीकरणस्य समाधानं अवगन्तुं बोर्डेन आदर्शप्रश्नपत्राणि सज्जीकृतानि सन्ति। छात्राणां कृते लाभः भविष्यति यत् चरणबद्धं अंकनव्यवस्थायाः आरम्भेण छात्राः तान् प्रश्नान् न त्यक्ष्यन्ति ये ते न अवगच्छन्ति। अर्थात् प्रश्नस्य अर्धं वा किञ्चित् भागं वा समाधाय अपि छात्राणाम् उत्तरं दातुं स्थाने अङ्काः प्रदत्ताः भविष्यन्ति। पूर्वं एतत् भवति स्म यत् यदि कश्चन छात्रः प्रश्नस्य अर्धपूर्णं उत्तरं जानाति तर्हि सः तस्य प्रश्नस्य उत्तरं दातुं स्थाने त्यजति स्म, परन्तु अधुना छात्राः न्यूनातिन्यूनं यावन्तः पदानि जानन्ति तावन्तः पदानि अवश्यमेव समाधानं करिष्यन्ति। अस्मिन् महती वार्ता अस्ति यत् छात्राः ज्ञास्यन्ति यत् ते सोपानलेखनार्थं अङ्कान् प्राप्नुयुः, अतः ते किञ्चित्पर्यन्तं प्रश्नस्य समाधानं कृत्वा न्यूनातिन्यूनं अर्धं अंकं प्राप्तुं शक्नुवन्ति। एवं छात्राः किमपि प्रश्नं न त्यक्ष्यन्ति। यदि छात्राः एतां चिह्नव्यवस्थां अवगत्य सम्यक् सज्जतां कुर्वन्ति तर्हि ते असफलाः न भविष्यन्ति, तेषां अङ्काः अपि उत्तमाः भविष्यन्ति। हिमाचलप्रदेशविद्यालयशिक्षामण्डलम् आगामिशैक्षणिकसत्रस्य अन्तर्गत मार्च २०२५ तमे वर्षे आयोज्यानां परीक्षाणां समये छात्राणां कृते एतां नूतनां सुविधां प्रदास्यति।

### नवीनप्रतिमानानाम् उपरि ध्यानं केन्द्रितम्

बोर्डसचिवः मेजर विशालशर्मा कथयति यत् अधुना छात्राणां सुविधायै शिक्षामण्डलेन नूतनरूपेण आगतानां प्रश्नानां आदर्शप्रश्नपत्राणि समाधाय बोर्डस्य जालपुटे स्थापिताः कृताः। तानि अधोभारणं कृत्वा छात्राः स्वयमेव ज्ञातुं शक्नुवन्ति यत् कथं पत्रस्य समाधानं करणीयम् इति शिक्षामण्डलेन दशम्याः द्वादश्याः च कक्षायाः आदर्शप्रश्नपत्राणां समाधानं कृत्वा चरणबद्धरूपेण चिह्नं कृत्वा जालपुटे स्थापितम् ।

# शिमला- कुफरी- चूड़धार- किलाड़म् इत्यत्र च ऋतोः प्रथमः हिमपातः




**हिमसंस्कृतवार्ताः - शिमला।** बहुकालानन्तरं हिमाचलप्रदेशे वातावरणं परिवर्तनं कृतवान्। रविवासरे शिमलानगरस्य रिजभूमौ, सिरमौरस्य कुफरी-चूड़धारे, नौहराधार-हरिपुरधारे, चम्बाजनपदस्य किलाड़े च ऋतोः प्रथमः हिमपातः अभवत्, शिमलानगरस्य रिजभूमौ अपि हिमपातः अभवत् लाहौलस्पीतौ रोहताङ्गदर्रा, बारालाचा, कोकसर-सिस्सु-दार्चा, जिस्पा, कुन्जुम-दर्रा इत्यादिषु उच्चतरशिखरेषु हिमपातः अभवत्। कुल्लौ बिलासपुर-जनपदस्य च नयनादेव्यां लघुवृष्टिः अभवत्।

राज्ये दिवसं यावत् शीतलवायुः प्रवहति स्म, यस्मात् कारणात् सम्पूर्णस्य राज्यस्य अधिकतमं तापमानं ५ तः ६ डिग्रीपर्यन्तं न्यूनीकृतम् अस्ति। राज्यस्य सप्तक्षेत्रेषु न्यूनतमं तापमानं शून्यसमीपं प्राप्तम् अस्ति। ताबो-क्षेत्रस्य न्यूनतमं तापमानं -१३.१ डिग्रीपर्यन्तं जातम्, यत् अस्मिन् ऋतौ अद्यावधि सर्वाधिकं न्यूनम् अस्ति। एतदतिरिक्तं शिमलाजनपदस्य नारकण्डा अपि माइनस मध्ये आसीत्, मनाली-सोलन-नगरयोः पारा शून्यं प्राप्तवान्। हिमपातस्य कारणेन अटलकन्दरा- सिस्सुक्षेत्रयोः स्खलितमार्गेभ्यः वाहनानि अटन्ति स्म। सम्मर्दस्य मध्ये निरुद्धाः १०० पर्यटकाः उद्धारिताः। लाहौल-स्पीतौ हिमपातः आरब्धः, अतः पर्यटकाः वातावरणं मनसि कृत्वा यात्रां कुर्वन्तु इति पुलिस-अधीक्षकः मयङ्क-चौधरी अवदत्। चम्बामण्डलस्य पाङ्गी आदिवासीक्षेत्रे सच्चे जोत इत्यत्र ३० सेमी हिमपातः अभवत्। एतदतिरिक्तं मण्डलस्य हुडान-भटोरी, सुराल-भटोरी, चस्क-भटोरी, थांदलम् इत्यत्र १५ से. मी. पर्यन्तं हिमपातः अभवत्। अपरपक्षे भरमौरस्य कुगति, मणिमहेश, चौबिया च इत्यत्र षट् सेन्टिमीटर् यावत् हिमपातः अभवत्। सायं ६ वादने राजधान्याः शिमला-नगरस्य रिजस्थले हिमबिन्दवः पतिताः, येन पर्यटकानां मुखयोः सुखं जातम्। रविवासरे आदिनं वायुप्रवाहस्य कारणेन नगरे परिसरेषु च शीतलता भवति स्म। अस्य ऋतोः प्रथमः हिमपातः ठियोग-कुफरीक्षेत्रयोः पर्यटकानां , स्थानीयजनानाञ्च मध्ये उत्साहं जनयति स्म। ठियोगक्षेत्रस्य न्यूनतमं तापमानं शून्यस्य समीपे प्राप्तम् अस्ति, अतः शीतस्य वृद्धिः अभवत्।

### सप्तजनपदेषु वर्षा-हिमपातस्य पीत-सचेतना

ऋतुविज्ञानकेन्द्रशिमलायाः अनुसारं सोमवासरे राज्यस्य केषुचित् स्थानेषु सामान्या वर्षा- हिमपातस्य, १० दिसम्बर-दिनाङ्के मध्य- उच्च- पर्वतीयक्षेत्रेषु वर्षा-हिमपातस्य सम्भावना वर्तते। मण्डी-बिलासपुरयोः जलाशययोः परितः १०, ११ दिनाङ्केषु घननीहारस्य पीतसचेतना प्रसारिता अस्ति। ११ तः १४ पर्यन्तं सम्पूर्णे राज्ये वातावरणं प्रतिकूलं भविष्यति।

# हिमाचलस्य द्वयोः पंचायतयोः राष्ट्रीयपुरस्कारः, राष्ट्रपतिः ११ दिसम्बरदिनांके पुरस्कारं प्रदास्यति




**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।** हिमाचलप्रदेशस्य द्वाभ्यां ग्रामपंचायताभ्यां त्रिभ्यः राष्ट्रियपंचायतपुरस्कारेभ्यः सम्मानितं करिष्यते। द्वाभ्यां ग्रामपंचायताभ्यां दीनदयाल-उपाध्याय पंचायतसततविकासपुरस्कार-२०२४ एवं एकस्मै नानाजीदेशमुखसर्वोत्तम-पंचायत सततविकासपुरस्कार-२०२४ हेतवे चयनं कृतमस्ति। एते पुरस्काराः ११ दिसम्बर दिनाङ्के नवीदिल्लीनगरे आयोजिते राष्ट्रियग्रामपञ्चायतपुरस्कारप्रदानकार्यक्रमे प्रदत्ताः भविष्यन्ति। दीनदयालउपाध्याय-पंचायतसतत- विकासपुरस्काराय हमीरपुरजनपदस्य बमसनखण्ड सिकंदर ग्रामपंचायतस्य एवं शिमलाजनपदस्य नारकांडाखण्डस्य थानाधार ग्रामपंचायतस्य चयनं जातमस्ति । सिकंदर ग्रामपंचायताय जलपर्याप्तपंचायतस्य वर्गे, थानाधार पंचायताय सामाजिकरूपेण न्यायपूर्णस्य एवं सुरक्षितपंचायतस्य वर्गे राष्ट्रीयपुरस्कारः प्रदास्यते। अस्मिन् अवसरे पंचायतेभ्यः ७५ लक्षरूप्यकाणां पुरस्कारधनं दीयते।

### १५ राज्यानां पंचायतेभ्यः राष्ट्रीयपुरस्कारः

अस्मिन् वर्षे कुलम् ४५ राष्ट्रियपुरस्काराणां कृते १५ राज्यानां ग्रामपञ्चायतानां चयनं कृतम् अस्ति । एतेषु ओडिशा-त्रिपुरा-प्रदेशयोः अधिकतमं सप्त-सप्त पुरस्काराः प्रदास्यन्ते, महाराष्ट्रस्य कृते षट्, आन्ध्रप्रदेशाय चत्वारः पुरस्काराः प्रदास्यन्ते । तदनन्तरं हिमाचलप्रदेशः बिहारः च अग्रे सन्ति, यत्र तेभ्यः त्रयः राष्ट्रियपुरस्काराः प्रदास्यन्ते।

### नानाजीदेशमुखसर्वोत्तमपुरस्कारः थानाधारपंचायताय

शिमलायाः थानाधार ग्रामपंचायताय नानाजीदेशमुख-सर्वश्रेष्ठपंचायतसतत- विकासपुरस्कार-२०२४ इत्यस्य अंतर्गतं सर्वश्रेष्ठग्रामपंचायतस्य वर्गे चयनं जातमस्ति। एषः पुरस्कारः थानाधारपंचायताय उत्कृष्टकार्याय, समाजस्य विभिन्नवर्गेभ्यः नीतीनां कृते सततविकासे योगदानाय च प्रदास्यते ।

### राष्ट्रीयपुरस्कारैः हिमाचलस्य पंचायतानां गौरवं वर्धयिष्यते

हिमाचलपंचायतीराजविभागस्य निदेशकः राघवः शर्मा अवदत् अयं पुरस्कारः हिमाचलप्रदेशस्य ग्रामपंचायतेभ्यः गौरवास्पदं वर्तते। एतत् एतेषां पंचायतानां सामूहिकप्रयत्नस्य जनहिताय कृतस्य कार्यस्य च परिणामः अस्ति तथा च अन्येषां पंचायतानां कृते अपि प्रेरणास्रोतः भविष्यति। राज्यस्य एतेषां ग्रामपञ्चायतानां प्रतिनिधिभिः ११ दिसम्बर दिनाङ्के नवीदिल्लीनगरे आयोजिते पुरस्कारवितरणसमारोहे पुरस्काराः प्राप्ताः भविष्यन्ति।

# भगवद्गीता सम्पूर्णस्य विश्वस्य मार्गदर्शनं करोति-उपराष्ट्रपतिः

उपराष्ट्रपति जगदीपधनकडः उक्तवान् यत् भगवद्गीता सम्पूर्णस्य विश्वस्य मार्गदर्शनं करोति। सः भगवद्गीतायाः सारं, सकारात्मकचिन्तनस्य, सामञ्जस्यस्य च सन्देशं अवगन्तुं सर्वेभ्यः प्रेरितवान् ।उपराष्ट्रपतिः अन्तर्राष्ट्रीयगीतामहोत्सवस्य अवसरे कुरुक्षेत्रस्य गीताज्ञानसंस्थायां आयोजिते कार्यक्रमे उक्तवान्।भगवद्गीतायाः पञ्च महत्त्वपूर्णसिद्धान्तानां उल्लेखं कुर्वन् उपराष्ट्रपतिः अवदत् यत् एते सिद्धान्ताः सामाजिकव्यवस्थायाः, शान्तेः, विकासस्य, भ्रातृत्वस्य, प्रगतेः, सुखस्य च कृते आवश्यकाः सन्ति। उपराष्ट्रपतिः अवदत् यत् भारते विगतदशवर्षेषु अपूर्वा आर्थिकप्रगतिः संस्थागतविकासश्च अभवत्।

# शिमला- फागलीसंस्कृतमहाविद्यालये किशोरशर्मा अध्यक्षः नरेन्द्रश्च उपाध्यक्षः




**हिमसंस्कृतवार्ताः,शिमला।**
फागलीसंस्कृतमहाविद्यालये पूर्वविद्यार्थीसङ्घस्य उपवेशनं शिमला-नगरे आयोजितम्, यस्मिन् पूर्वविद्यार्थीसङ्घस्य कार्यकारिण्याः चयनं जातम्। उपप्राचार्यः डॉ. दिनेशशर्मा अवदत् यत् १९१७ तः प्रचलितस्य अस्य महाविद्यालयस्य इतिहासः गौरवपूर्णः अस्ति। अयं महाविद्यालयः महामहोपाध्यायः आचार्य दिवाकरदत्तशर्मा इत्यस्य कार्यस्थलम् अभवत्, यः अस्य राज्यस्य नाम हिमाचलम् इति कृतवान् । तस्य समर्थमार्गदर्शने अस्मिन् महाविद्यालये अनेके विद्वांसः उत्पन्नाः । अद्यत्वे अपि अयं महाविद्यालयः सर्वथा राज्यस्य मुख्यमहाविद्यालयेषु अन्यतमः अस्ति । तदनन्तरं आयोजितेषु निर्वाचनेषु कार्यकारिणीनिर्माणप्रक्रिया निर्वाचकेन सीतारामशर्मा इत्यनेन आरब्धा। यस्मिन् किशोरशर्मा, यः सूचनाप्रौद्योगिकीविशेषज्ञः अस्ति, सः अध्यक्षः चयनितः तत्रैव नरेन्द्रशर्मा सोनू च उपाध्यक्षः निर्वाचितः। शालिग्रामः कोषाध्यक्षः, डॉ. सुनीलः महासचिवः, कमलकान्तः संयुक्तसचिवः निर्वाचितः। राष्ट्रपतिपुरस्कारेण सम्मानितस्य महामहोपाध्यायः आचार्यकेशवशर्मा इत्यस्य नाम कार्यकारिण्याः संरक्षकत्वेन आदरपूर्वकं अनुमोदितम्। परामर्शकमंडले प्रसिद्धः ज्योतिर्विद् डॉ. मस्तराम शर्मा, सीताराम शर्मा, डॉ. नरेशः, पंकजः, इशिता श्यामः, परीक्षितश्च मनोनीताः। सदस्येषु धर्मप्रकाशः, रोहितः, पवनः, कपिलः, सुनीलः, अंजलिः, श्रुतिः, खेमराजः, राजेशः, विनयः इत्येतेषां चयनं जातम्। अध्यक्षः किशोरशर्मा अवदत् यत् महाविद्यालयस्य सर्वोन्मुखविकासे अस्माकं पूर्णसहकार्यं भविष्यति इति । प्राचार्य डॉ. मुकेशशर्मा इत्यस्य कुशलमार्गदर्शने महाविद्यालयः सर्वतोन्मुखीं प्रगतिम् कुर्वन् अस्ति तथा च अस्मिन् पूर्वछात्रसङ्घः सर्वथा सहायकः भविष्यति।

## पालिताना-महिलामहाविद्यालये संस्कृतगौरवपरीक्षा सम्पादिता



हिमसंस्कृतवार्ताः- जगदीशडाभी (अहमदाबाद-गुजरातम्)
संस्कृतभारती, सौराष्ट्रप्रान्तद्वारा प्रतिवर्षं श्रीमती पी.एन.आर. महाविद्यालये संस्कृतगौरवपरीक्षा 7 दिसम्बर, 2024 दिनाङ्के आयोजिता। केन्द्रीयसंयोजकः श्री डॉ. पंकजत्रिवेदिवर्यः छात्रेभ्यः शुभकामनाः प्रदत्तवान् । तस्य मार्गदर्शने शान्तिपूर्वकं परीक्षा आयोजिता । संस्कृतकेन्द्रस्य शिक्षकः श्री अमरसिंह राठोडः, नगरसंयोजिका कृपाली कामलिया, साप्ताहिकसंयोजिका दिलशादबेन पाटडिया, बालकेन्द्रस्यसंयोजिका मायाबेन बोरीचा, संस्कृतछात्रे दर्शना चौहान, मयूरी सोण्डागर एतै :गौरवपरीक्षायाः आयोजनं कारितम् । सौराष्ट्रप्रान्ते प्रतिवर्षं डिसेम्बरमासे एतस्याः परीक्षायाः आयोजनं करोति यत् सर्वभाषाजनानाम् मध्ये संस्कृतस्य महत्त्वं दर्शयति। प्रवेशिकायां २६७, प्रदीपिकायां ८७, प्रमोदिकायां ६२, प्रविकायां ३३ छात्राः कुलम् ४४९ छात्राः संस्कृतगौरवपरीक्षां लिखित्वा सरलसंस्कृतं लेखितुं, पठितुं, सरलं संस्कृतं वक्तुं शिक्षितुं रुचिं च प्रदर्शितवन्तः। प्रतिवर्षं छात्राः वर्धन्ते। पलिताना-नगरस्य विभिन्नानां विद्यालयानां छात्राध्यापकाः, नगरवासिनः, वृद्धाः अपि एतां परीक्षां दातुं जागरूकताम् उत्थापितवन्तः। आगामिवर्षेषु अपि संस्कृतस्य प्रसारस्य प्रचारार्थं ४ अभियानं गृहीतम् । समग्रतया छात्राः स्वसन्तुष्टिं प्रकटितवन्तः।

## राजस्थानस्य पालीक्षेत्रे बृहत् दुर्घटना, विद्यालयस्य छात्रैः पूर्णं बसयानं पतितम्, त्रयः बालकाः मृताः, बहवः घातिताः

पालि । राजस्थानस्य पालीक्षेत्रे एका बृहत् दुर्घटना अभवत्। अत्र देसुरी की नाल इत्यस्य समीपे एकस्य विद्यालयस्य बसयानं नियन्त्रणात् बहिः गत्वा पञ्चाबमोड् इत्यत्र दुर्घटना ग्रस्तः अभवत् । दुर्घटनासमये बसयाने प्रायः ५५ बालकाः गच्छन्ति स्म, येषु तिस्रः बालिकाः स्थले एव मृताः, अन्ये १४ बालकाः घातिताः एकस्य क्षतिग्रस्तस्य स्थितिः गम्भीरा इति कथ्यते ।
सूचनानुसारं राछिया अमेटा नगरस्य महात्मा गान्धी विद्यालयस्य एते छात्राः परशुराममहादेवमन्दिरस्य दर्शनार्थं गच्छन्ति स्म। चारभुजातः देसुरीं प्रति गच्छन्ती बसयानं पञ्चाबमोड् उपत्यकायां बसयानस्य ब्रेकयन्त्रं विफलम् अभवत्, ततः बसयानं नियन्त्रणं त्यक्त्वा परिवर्तितः। दुर्घटनाविषये सूचना प्राप्तमात्रेण देसुरी-चारभुजा-पुलिसयोः दलाः तत्स्थानं प्राप्तवन्तः । स्थानीयजनाः अपि उद्धारकार्य्ये पुलिसस्य साहाय्यं कृतवन्तः, आहतान् छात्रान् बसयानात् बहिः आकृष्य च। घातितानां चिकित्सायै देसुरी-चिकित्सालये प्रवेशः कृतः अस्ति । तस्मिन् एव काले दुर्घटनायाः अनन्तरं चिकित्सालयस्य सम्पूर्णः कर्मचारिणः सक्रियः भूत्वा आपत्कालीनसेवाम् आरब्धवान् । आहतबालानां कृते सर्वाणि सम्भाव्यचिकित्सानि आवश्यकानि सुविधानि च प्रदत्तानि सन्ति।

# मुद्राविज्ञानेन स्वास्थ्यलाभः

**हिमसंस्कृतवार्ताः, डॉ.अमनदीपशर्मा।**



भारतस्य प्राचीनैः मनिषिभिः दीर्घसाधनानन्तरं गहनसाधनया च शरीरं निरामयं कर्तुं विभिन्नानां चिकित्सा पद्धतीनाम् विकासः कृतः। तासु पद्धतिषु मुद्राविज्ञानमपि एका तादृशी पद्धतिरस्ति यया हस्तयोः अङ्गुलीभिः अङ्गुष्ठस्य संयोगेन विभिन्नानां मुद्राणाम् अभ्यासेन स्वास्थलाभः प्राप्तुं शक्यते। चिकित्साशास्त्रे हठयोगस्य आसनानां, प्राणायणविधीनां, बन्धादीनां च ज्ञानं बहुषु जनेष्वस्ति परञ्च मुद्राणां प्रयोगविषये न्यूनैव जनाः जानन्ति। वस्तुतः अस्माकं शरीरं पृथ्वी-जल-तेज-वाय्वाकाशादिभिः पञ्चतत्वैः निर्मितमस्ति। एतेषां संतुलनं यावत् पर्यन्तं भवति, तावद् पर्यन्तं मनुष्यः स्वस्थः तिष्ठति, असन्तुलेनैव स्वास्थ्यहानिः भवति। विभिन्नाभिः मुद्राभिः एतेषु पञ्चतत्वेषु संतुलनं स्थापयितुं शक्यते। मनुष्यशरीरे सप्तचक्राणि सन्ति- 1. मूलाधारचक्रम् 2. स्वाधिष्टानचक्रम् 3. मणिपुरचक्रम् 4. अनाहतचक्रम् 5. विशुद्धिचक्रम् 6. आज्ञाचक्रम् 7. सहस्त्रारचक्रम्। एतानि केन्द्राणि शक्तिकेन्द्राणि सन्ति। मुद्राप्रयोगेण एतेषां शक्तिकेन्द्राणां संवर्धनं कर्तुं शक्यते।
पञ्चतत्वानां सप्तचक्राणाञ्च प्रतिनिधित्व अस्माकं का अङ्गुली करोति इति विषये निम्नप्रकारेण तालिका अस्ति-

| | | |
|---|---|---|
| 1.कनिष्ठिका (Little Finger) | जलतत्वम् | स्वाधिष्ठानचक्रम् |
| 2.अनामिका (Ring Finger) | पृथ्वीतत्वम् | मूलाधारचक्रम् |
| 3.मध्यमा (Middle Finger) | आकाशतत्त्वम् | विशुद्धिचक्रम् |
| 4.तर्जनी (Index Finger) | वायुतत्त्वम् | अनाहतचक्रम् |
| 5.अङ्गुष्ठः (Thumb) | अग्नितत्त्वम् | मणिपुरचक्रम् |

सर्वादौ अद्य वयं आकाशमुद्रायाः विषये जानीम-

### आकाशमुद्रा-



**विधिः-** मध्यमा अङ्गुल्याः अग्रभागम् अङ्गुष्ठस्य अग्रभागेन योजयेत्, अवशिष्टाः तिस्रः अङ्गुल्यः तीर्यक् भवेत्।

**अवधिः-** प्रतिदिनम् एकहोरात्मकः कालः

**लाभः-**

•आकाशतत्त्वस्य विस्तरेण रिक्ततायाः समाप्तिः भवति, नकारात्मकाः विचाराः, जाड्यता च दूरे गच्छति।
•कर्णयोः श्रवणक्षमतायाः विकासः भवति, कर्णरोगाणाम् अपशमनं भवति येषु कर्णयोः स्रावः, कर्णयोः ध्वनिदोषः, बधिरता च अपगच्छति।
•आकाशतत्वस्य विस्तरेण हृदयरोगेषु लाभः, उच्चरक्तचापे च लाभः भवति।
•अस्थ्यः सुदृढ़ाः भवन्ति, कैल्शियम् इत्यस्य न्यूनता अपगच्छति। ओस्टीयोपोरोसिस अर्थात् अस्थिक्षीणता दूरमपगच्छति।
•वामहस्तेन आकाशमुद्रा, दक्षिणेन च पृथ्वीमुद्रायाः अभ्यासेन सन्धिस्थानस्य पीडासु लाभः भवति।
•मुखस्य अस्थेः पीडायां लाभः भवति।
•ध्यानावस्थया एषा मुद्रा आज्ञाचक्रे सहस्त्रारचक्रे च कम्पनं जनयति, येन दिव्यशक्तिनाम् अनुभूतिः भवति।
•मानसिकशारीरिकरोगग्रस्तेभ्यः अन्यथासमर्थेभ्यः बालेभ्यः एषाः रामबाणौषधिः वर्तते।

# ।। श्रीरामायणकथा ।।



## उत्तरकाण्डम्!



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

(पञ्चचत्वारिंशः सर्गः)

**लवणासुरवधार्थं शत्रुघ्नं प्रति रामस्य आदेशः**

एवं प्रतिदिनं तयोः रामलक्ष्मणयोः संवादः भवति स्म। ततः वासन्तिकी निशा सम्प्राप्ता, तदा नाधिकः शीतः न च घर्माधिकः आसीत्। तदानीम् एकस्मिन् विमले प्रभाते रामः पौर्वाह्णिकीं क्रियां कृत्वा पौरकार्यपरिदर्शनार्थं सभायाम् उपविष्टः अभवत्। तदानीं सुमन्त्रः आगम्य रामम् अब्रवीत् हे राजन्! द्वारे एते प्रतिहताः तापसाः तिष्ठन्ति। हे महाराज! एते यमुनातीरवासिनः महर्षयः भार्गवं च्यवनं च पुरस्कृत्य तव दर्शनार्थं प्रार्थयन्ते। तस्य तद्वचनं श्रुत्वा धर्मविद् रामः अब्रवीत् हे महाभाग! शीघ्रं ते भार्गवप्रमुखाः द्विजाः प्रवेश्यन्ताम्। राज्ञः आज्ञां पुरस्कृत्य द्वास्थः प्राञ्जलिर्भूत्वा तदा तान् सुदुरासदान् तापसान् प्रावेशयत्। तत्र तेषां महात्मनां तापसानां स्वतेजसा दीप्यमानं शतं राजभवनं प्रविष्टम्।

ते द्विजाः पूर्णकलसैः सर्वतीर्थजलं फलमूलं च गृहीत्वा रामाय उपहारत्वेन अददुः। रामचन्द्रः प्रीतिपूर्वकं सर्वतीर्थजलं विविधानि फलानि च प्रतिगृह्य तान् सर्वान् महामुनीन् अब्रवीत् हे ऋषयः! इमानि आसनमुख्यानि सन्ति, भवद्भिः यथार्हम् उपविश्यताम्। रामस्य भाषितं श्रुत्वा ते सर्वे महर्षयः काञ्चनासनेषु उपाविशन्। तत्र उपविष्टानृषीन् दृष्ट्वा प्राञ्जलिर्भूत्वा रामः वाक्यमब्रवीत् - भवताम् आगमनकार्यं किम्, किञ्च करोमि, आज्ञापयन्तु। अहं भवताम् अभिलाषम् अनायासेन पूरयिष्यामि। इदं सकलं राज्यं जीवितं च सर्वं द्विजार्थमेव इत्यहं सत्यं ब्रवीमि।

इत्येवं रामस्य वचनं श्रुत्वा यमुनातीरवासिनः उग्रतापसाः ऋषयः सर्वे साधु साध्विति ब्रुवन्तः तस्य बहुधा प्रशंसाम् अकुर्वन्। अत्यन्तं हृष्टाः ते रामम् अब्रुवन् हे राजन्! बहवः महाबलाः पार्थिवाः अतिक्रान्ताः , किन्तु कश्चिदपि कार्यस्य विवरणम् अज्ञात्वा ईदृशीं प्रतिज्ञां न अकरोत्, केवलं त्वमेव असि येन कारणम् अनवेक्ष्य हि ब्राह्मणगौरवाद् इयं प्रतिज्ञा कृता। ततः त्वं कर्ता असि इत्यत्र संशयः नास्ति। त्वमेव अस्मान् महाभयात् त्रातुम् अर्हसि।

## भारत-नेपाल-सांस्कृतिकमहोत्सवः

नेपालस्य लुम्बिनीनगरे आयोजितस्य भारत-नेपाल-सांस्कृतिकमहोत्सवस्य द्वितीयसंस्करणे बौद्धधर्मस्य विषये विशेषं ध्यानं दत्त्वा उभयदेशानां समृद्धसांस्कृतिकविरासतां परम्पराणां च प्रकाशनं कृतम्। काठमाण्डौ स्थितस्य भारतदूतावासस्य मिशनस्य उपप्रमुखेन लुम्बिनीप्रान्तस्य राज्यपालेन लुम्बिनी विकासन्यासस्य उपाध्यक्षेन च संयुक्तरूपेण उद्घाटनं कृतम्। अस्मिन् कार्यक्रमे गणमान्यजनाः, समाजस्य सदस्याः, बौद्धभिक्षवः च भागं गृहीतवन्तः ।

# धारावाहिकं

## गीताप्रश्नोत्तरम् - ८३

**अर्जुनः** - भगवन् ! दैविकसम्पद्युक्तः अधिकारी कीदृग्भवतीति त्वन्मुखतः मया श्रुतं यथामति ज्ञातञ्च । परन्तु तत्सम्पत्तेः अनधिकारी चेत् कः ? एवञ्च तस्य कीदृशानि लक्षणानि भवन्ति ?

**श्रीकृष्णः** - पार्थ ! यः आसुरीसम्पद्वान्, सः हि तद्दैविकसम्पत्तेः अनधिकारी कथ्यते । तादृशेषु एवंप्रकारकाणि कानिचन विपरीतलक्षणानि दरीदृश्यन्ते, तच्छृणु । प्रथमतः, सदसद्गुणान् बहितः आत्मनि आरोप्य लाभपूजाख्यात्यादीनां प्राप्त्यर्थं लोकेभ्यः प्रदर्शनं नाम दम्भः, यश्च तस्मिन् विद्यमानो भवति । ममत्वयुक्तैः वस्तुभिः आत्मनि महत्तानुभवः नाम दर्पः, यश्च तस्मिन् प्राप्यते । अहन्तायुक्तैः वस्तुभिः आत्मनि श्रेष्ठत्वस्य भावना नाम अभिमानः, यश्च तस्मिन् भवति । एवं क्रोधः, मनोवाण्योः कठोरता, सदसद्युक्तेषु कर्तव्याकर्तव्येषु स्वविवेकस्य अनादरः इत्येतानि विपरीतानि लक्षणानि यस्मिन् विद्यमानानि सन्ति, सः हि दैविकसम्पत्तेः अनधिकारी आख्यायते । हे धनञ्जय ! एतानि सर्वाण्येव आसुरीसम्पत्प्राप्तस्य लक्षणानि सन्ति । एतैः लक्षणैर्युक्तः मनुष्यः प्रायः मद्भक्तेः अनधिकारी भवति ।

**अर्जुनः** - परन्तु प्रभो ! एतयोः दैव्यासुरीसम्पदोः फलं किम् ?

**श्रीकृष्णः** - अर्जुन ! दैविकसम्पत् मुक्तिप्रदा भवति, परम् आसुरीसम्पत् बन्धनकारिका भवतीति विद्धि । हे अर्जुन ! त्वं शोकं मा कुरु । यतोहि त्वं दैविकसम्पदं प्राप्तवान् असि ।

**अर्जुनः** - हे भगवन् ! आसुरीसम्पत् कथं वा बन्धनकारिका भवति ?



**श्रीकृष्णः** - हे भारत ! अस्मिन् लोके द्विधा प्राणिनो स्तः, एकः दैवीसम्पद्युक्तः, अपरश्च आसुरीसम्पद्युक्तः । दैवीसम्पद्विषये इतः पूर्वं विस्तरेण उक्तं मया । अधुना च आसुरीसम्पत् कथं भवतीति विस्तरशः शृणु । आसुरीसम्पद्वन्तः मनुष्याः 'कस्मिन् प्रवर्तेमहि वयं, कस्माच्च निवर्तेमहि' इति न जानन्ति । तेषु शौचाचारः, सदाचारः, सत्यपालनम् इत्यादिकं न दृश्यते ।

**अर्जुनः** - शौचाचारादिकं कथं न भवति तेषां भगवन्?

**श्रीकृष्णः** - यतोहि तेषां दृष्टिर्हि विपरीता । तेषां दृष्ट्यां तु अयं संसारः असत्यः, कारणम् अस्मिन् न किमपि शास्त्रधर्मनियमादिकं सत्यमस्ति, धर्माधर्मपापपुण्यादीनां नास्ति कापि मर्यादा । अस्य संसारस्य न कोऽपि रचयिता स्यात्, केवलं स्त्रीपुरुषयोः आकर्षणेन एव संसारोऽयम् उत्पद्यते । अतः अस्य संसारस्य उत्पत्तिहेतुः हि कामः अस्ति, नान्यः कोऽपीति ते परस्परं कथयन्ति । इत्थं तेषां सर्वत्र विपरीता दृष्टिः स्यादिति, शम् ।

(गी०- १६/०४-०८) (अनुवर्तिष्यते)

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्

## सामान्यज्ञानम्

प्रश्नः 1. भारते **नटराजमन्दिरम्** कुत्र अस्ति?

उत्तरम् : चिदंबरम (तमिलनाडुप्रान्ते)

प्रश्नः 2. '**काव्यादर्शः**' इत्यस्य रचयिता कः अस्ति?

उत्तरम् - 'दण्डी'।

प्रश्नः 3. सौरमण्डले कः ग्रहः "लोहितग्रहः" (लालग्रह) इति नाम्ना प्रसिद्धः अस्ति?

उत्तरम् - सौरमण्डले "लोहितग्रहः" इति नाम्ना मङ्गलग्रहः प्रसिद्धः अस्ति।

प्रश्नः 4. सर्वातिः उष्णः महाद्वीपः कः अस्ति?

उत्तरम्- सर्वातिः उष्णः महाद्वीपः अफ्रीका अस्ति।

प्रश्नः 5. भारतस्य राष्ट्रीयध्वजं केन डिजाइनितं कृतम् (कल्पितम्) अस्ति?

उत्तरम्- भारतस्य राष्ट्रीयध्वजं 'पिंगली वेंकय्या' इत्येन डिज़ाइनितं कृतम् (कल्पितम्) अस्ति।

## बाङ्गलादेशभारतयोः प्रचलितव्यापारस्य मन्दतायाः समाधानस्य आशास्ति- बाङ्गलादेशस्य विदेशपरामर्शकः

बाङ्गलादेशस्य विदेशपरामर्शकः मोहम्मद तौहीद हुसैनः उक्तवान् यत् भारतेन सह प्रचलितव्यापारस्य मन्दतायाः समाधानस्य आशास्ति इति बाङ्गलादेशस्य राज्यसमाचारसंस्थायाः सूचना अस्ति। ढाकानगरे एकस्मिन् संगोष्ठ्यां वदन् सः अवदत् यत् शीघ्रमेव समस्यानां समाधानं सौहार्दपूर्णतया भविष्यति।

विदेशपरामर्शकः अवदत् यत् भारतीयविदेशसचिवः विक्रममिश्री अद्य बाङ्गलादेशस्य भारतस्य च विदेशकार्यालययोः मध्ये चर्चायै ढाकानगरम् आगमिष्यति। द्विपक्षीयव्यापारविषयेषु अन्ये च परस्परहितविषयेषु चर्चा भविष्यति इति अपेक्षा अस्ति।

## जीवनस्य मूल्यम् (४६)



जीवन मूल्यवान् अस्ति एतद् विस्मृत्य
जनाः दुखःग्रस्ता जायमानाः सन्ति
धनेन शय्या क्रेतुं शक्यते, न तु निद्रा ।
धनेन आहार पदार्थाः क्रेतुं शक्यम् , न तु क्षुन्निवारणम् कर्तुं शक्यम् ।
जीर्णशक्ति अपि न प्राप्यते ।
धनेन अलङ्काराणि,वस्तुनि क्रेतुं शक्यते, किन्तु आरोग्यं न लभ्यते ।
धनेन मनोरञ्जनं प्राप्तुं शक्यम् ,किन्तु मनश्शान्ति न लभ्यते।
कालयन्त्रं क्रेतुं शक्यम् , न तु कालः क्रेतुं शक्यम्।
सहजनाःयोजयितुं शक्याः, न तु अकृत्रिमसुहृत् प्राप्तुं शक्यः ।
धनबलेन समाजे उच्चतरं स्थानं प्राप्तुं शक्यं किन्तु गौरवं प्राप्तुं कदापि न शक्यम् ।

डा.वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्